**स्पृष्टास्पृष्ट** न० स्पृष्टेन वा सम्यक् स्पृष्टम् । परस्परस्पर्शने

**स्पृष्टास्पृष्टि** न० स्पृश-भावे-क्त कर्मव्यतिहारे इच्समा० पूर्वपददीर्घः । परस्परस्पर्शने "तीर्थे विवाहे यात्रायां संग्रामे देशविप्लवे । नगरग्रामदाहे च स्पृष्टास्पृष्टि न दुष्यति । आपद्यपि च कष्टायां स्वभये पीड़िते तथा । मातापित्रोर्गुरोश्चैव निदेशवर्त्तने तथा" इति बृहस्पतिः ।

**स्पृष्टि** स्त्री स्पृश-क्तिन् । स्पर्शे अमरः । [अपस्पृहत् ।

**स्पृह** इच्छायां अद० चुरा० उभ० सक० सेट् । स्पृहयति-ते

**स्पृहणीय** त्रि० स्पृह-अनीयर् । १वाञ्छनीये २श्लाघ्ये च "अहो व्रतासि स्पृहणीयवीर्य्यः" कुमारः ।

**स्पृहयालु** त्रि० स्पृहि-आलुच् । स्पृहाशीले ।

**स्पृहा** स्त्री स्पृह-अङ् । इच्छायाम् अमरः । "मिथुने स्पृहावती" कुमारः ।

वर्णभेदे विषयभेदे स्पृहौचित्यं यथा

"तपोधनं ब्राह्मणानां तपः कल्पतरुस्तथा । तपस्या कामधेनुश्च सन्ततं तपसि स्पृहा । ऐश्वर्य्ये क्षत्रियाणाञ्च वाणिज्ये च तथा विशाम् । शूद्राणां विप्रसेवायां स्पृहा वेदैरनिन्दिता । क्षत्रियाणाञ्च तपसि स्पृहातीव प्रशंसिता । ब्राह्मणानां विवादेषु स्पृहातीव विनिन्दिता । क्षत्रियाणां रणो धर्मो रणे मृत्युर्न गर्हितः । रणे स्पृहा ब्राह्मणानां लोके वेदे विडम्बना । ब्रह्मवै० ग० ख० २१ अ० । [नीयेत्रि० ।

**स्पृह्य** पु० स्पृह-कर्मणि यत् १मातुलुङ्गवृक्षे रत्ना० २वाञ्छ

**स्फट** विशीर्णतायाम् अक० भ्वा० पर० सेट् । स्फटति अस्फटीत्-अस्फाटीत् । इदित्स्वार्थे स्फण्टति अस्फण्टीत् ।

**स्फट** पुंस्त्री० स्फट-अच् । सर्पफणायाम् अमरटीका ।

**स्फटि(टी)** स्त्री स्फट-इन् वा ङीप् । (फट्किरी) वणिग्द्रव्यभेदे भावप्र० । स्वार्थे क । तत्रार्थे "स्फटिका तु कषायोष्णा वातपित्तकफव्रणान् । निहन्ति श्वित्रवीसर्पान् योनिसङ्कोचकारिणी" भावप्र० ।

**स्फटि(टी)क** पु० स्फटि(टी)रिव कायति कै-क । १रत्नामख्याते मणौ हला० स्वार्थे क वा ह्रस्वः । २स्फट्यां भावप्र० । स्वार्थेऽण् । स्फाटिकमप्यत्र न० शब्दर० । "स्फटिकः समवीर्यश्च पित्तदाहार्त्तिदोषनुत् । तस्याक्षमालां जपतां दत्ते कोटिगुणं फलम्" । तत्परीक्षा यथा "यद्गङ्गातोयबिन्दुच्छविविमलतमं निस्तुषं नेत्रहृद्यं स्निग्धं शुद्धान्तरालं मधुरमतिहिमं पित्तदाहास्रहारि । पाषाणे यन्निघृष्टं स्फुटितमपि निजां स्वच्छतां नैव जह्यात् तज्जात्यं जातु लभ्यं शुभमुपचिनुते शैवरत्नञ्च रत्नम्" राजनि० ।

"मुक्ताविद्रुमवज्रेन्द्रवैदूर्य्यस्फटिकादिकम् । मणिरत्नं सरं शीतं कषायं स्वादु लेखनम् । चक्षुष्यं धारणात्तच्च पापालक्ष्मीविनाशनम्" राजवल्लभः । तस्य उत्पत्तिकथादिकं यथा "कावेरीविन्ध्ययवनचीननेपालभूमिषु । लाङ्गली व्यकिरन्मेदो दानवस्य प्रयत्नतः । आकाशशुद्धं तेजाढ्यमुत्पन्नं स्फटिकं ततः । मृणालशङ्खधवलं किञ्चिद्वर्णान्तरान्वितम् । न तत्तुल्यं हि रत्नानामथ वा पापनाशनम् । संस्कृतं शिल्पिना सद्यो मूल्यं किञ्चिल्लभेत्ततः" गारुड़े ७९अ० । तथा "हिमालये सिंहले च विन्ध्याटवितटे तथा । स्फटिकं जायते चैव नानारूपं समप्रभम् । हिमाद्रौ चन्द्रसङ्काशं स्फटिकं तत् द्विधा भवेत् । सूर्य्यकान्तञ्च तत्रैकं चन्द्रकान्तं तथाऽपरम् । सूर्य्यांशुस्पर्शमात्रेण वह्निं वमति यत् क्षणात् । सूर्य्यकान्तं तदाख्यातं स्फटिकं रत्नवेदिभिः । पूर्णेन्दुकरसंस्पर्शादमृतं स्रवति क्षणात् । चन्द्रकान्तं तदाख्यातं दुर्लभं तत् कलौ युगे । अशोकपल्लवच्छायं दाडिमीबीजसन्निभम् । विन्ध्याटवीतटे देशे जायते मन्दकान्तिकम् । सिंहले जायते कृष्णमाकरे गन्धनीलके । पद्मरागभवस्थाने विविधं स्फटिकं भवेत् । अत्यन्तनिर्मलं स्वच्छं स्रवतीव जलं शुचि । ज्योतिर्व्वलनमासिद्धं मुक्ताज्योतीरसं द्विज ! । तदेव लोहिताकारं राजावर्त्तसमुद्भवम् । आनीलं तत्तु पाषाणं प्रोक्तं राजमयं शुभम् । ब्रह्मसूत्रमयं यत्तु प्रोक्तं ब्रह्ममयं द्विज !" युक्तिकल्प० ।

**स्फटिकाचल** पु० स्फटिक इव शुभ्रत्वात् अचलः । १कैलासपर्वते २स्फाटिकमयपर्वते च । स्फटिकाद्रिप्रभृतयोऽप्यत्र

**स्फटिकाद्रिभिद्(द)** पु० स्फटिकाद्रिं स्फटिकपर्वतं भिनत्ति माहात्म्यात् भिद-क्विप् क वा । कर्पूरे राजनि० ।

**स्फटिकाभ्र** पु० स्फटिकवर्णः अभ्र इव । कर्पूरे राजनि० ।

**स्फटिकारि** पु० ६त० । (फट्किरि) वणिग्द्रव्यभेदे तस्य स्फटिकतुल्यदीप्तिमत्त्वाकृतित्वम् रत्नमा० ।

**स्फण्ड** परिहासे चु० उभ० सक० सेट् इदित् । स्फण्डयति-ते अपस्फण्डत्-त । [टीत् ।

**स्फर** चले स्फूर्त्तौ च तुदा० प० अक० सेट् । स्फरति अस्फा-

**स्फरण** न० स्फर-भावे ल्युट् । स्फुरणे । [अस्फालीत् ।

**स्फल** चले स्फूर्त्तौ च तुदा० पर० अक० सेट् । स्फलति

**स्फाटिकोपल** पु० स्फटिकमेव उपलः । स्फाटिके शिला० ।